# व्याकरण-विभागीया अन्ताराष्ट्रिया संगोष्ठी

(International Seminar of Deptt. of Vyakaran)

# समासशक्ति-सिद्धान्ते परावर्तन-बिन्दवः

(Turning Points in the concept of Samasa-shakti)

(28 जनवरी, 2019 तः 29 जनवरी, 2019 पर्यन्तम्)


आयोजकः अध्यक्षश्च

प्रो. के.बी. सुब्बरायुडुः

संयोजकः

प्रो. बनमालीबिश्वालः

सहसंयोजकौ

श्रीश्रीओमशर्मा

डा. नीतेशद्विवेदी



व्याकरण-विभागः

राष्ट्रिय-संस्कृत-संस्थानम्

(राष्ट्रियमूल्यांकनप्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः,
भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः समविश्वविद्यालयः)

श्रीरघुनाथ-कीर्ति-परिसरः

देवप्रयागः, पौडी-गढवालः, उत्तराखण्डः-249 301

01375 266028

email-srkcampus@gmail.com

www.srkcampus.org

## ॥ प्रास्ताविकम्॥

अष्टाध्याय्यां पाणिनिना यद्यप्यनेकेषां पारिभाषिक-शब्दानां लक्षणानि कृतानि तथापि अनेके शब्दास्तत्र पारिभाषिकेऽर्थे प्रयुक्ताः सन्तोऽपि परिभाषिताः न वर्तन्ते। पूर्व-पाणिनीय-पारिभाषिकशब्दानां लक्षणानि पाणिनेः पूर्वजैः वैयाकरणैः स्व-स्वशास्त्रेषु प्रदत्ताः। अतस्तेषां पुनः परिभाषा-विधाने पाणिनिः शिथिलो दृश्यते। समासोऽपि कश्चित्पूर्व-पाणिनीयः पारिभाषिक-शब्दोऽस्ति। अतस्तस्य साक्षाल्लक्षणं पाणिनिना अष्टाध्याय्यां न विहितम्। परन्तु पाणिनीयसरणिमनुसृत्य तस्य किञ्चिल्लक्षणं कर्तुं शक्यते।

समासानां विभजनमपि विभिन्नैः शास्त्रकारैः भिन्नया भिन्नया प्रणाल्या कृतम्। तेषु विभागेषु अव्ययीभाव-तत्पुरुष-द्वन्द्व-बहुब्रीह्यात्मकः चतुर्धा-विभागः प्राचीनतमः प्रसिद्धतमश्चास्ति। एतेषां चतुर्विधानां समासानां स्वरूपलक्षणानि पतञ्जलिना कृतानि–पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिश्चेति।

भट्टोजिदीक्षितेन वैयाकरण-सिद्धान्तकारिकायाम् एवं च कौण्डभट्टेन वैयाकरणभूषणे समासस्य पारम्परिकश्चतुर्धा-विभागः समालोचितः। समासस्य बाह्यस्वरूपमभिलक्ष्य भट्टोजिदीक्षितेन समासानां किञ्चिदन्यथा विभजनं प्रस्तुतम्। तद्यथा–

**सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।**
**सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः।।**

समासार्थः शक्त्याऽवगम्यते इति वैयाकरणा आमनन्ति। किन्तु नैयायिकाः तथा मीमांसकेष्वेके लक्षणयैव समासार्थोऽवगम्यते इति सयुक्तिकमुपस्थापयन्ति। वैयाकरणैः स्व-स्वग्रन्थेषु समासशक्तेः प्रतिनिधिभूता अनेके शब्दाः प्रयुक्ताः। यथा समूहशक्तिः, समुदायशक्तिः, अतिरिक्तशक्तिः, अखण्डशक्तिः, विशिष्टशक्तिः, क्लृप्तशक्तिः, एकशक्तिः तथा स्वतन्त्रशक्तिश्च। पक्षान्तरे नैयायिकैः मीमांसकैरपि विभिन्न-समासेषु भिन्ना भिन्ना लक्षणाऽङ्गीकृता–पद-लक्षणा, वाक्य-लक्षणा, समुदाय-लक्षणा, समूह-लक्षणा, साहित्य-लक्षणा, विशिष्ट-लक्षणा, सम्बन्धलक्षणा, शक्यसम्बन्ध-लक्षणा, सामीप्य-लक्षणा, प्राशस्त्य-लक्षणा, जहत्स्वार्थ-लक्षणा, अजहत्स्वार्थ-लक्षणा, निरूढ-लक्षणा, लक्षित-लक्षणा च।

एवमत्र स्थूलरूपेण पक्षद्वयमवलोक्यते। एकतः लक्षणावादिनः नैयायिक-मीमांसकाः ये समासे शक्तिं नाङ्गीकुर्वन्ति। पक्षान्तरे समुदायशक्तिवादिनः वैयाकरणा समासे विशिष्टां शक्तिमङ्गीकुर्वन्ति। किन्तु प्रसङ्गेऽस्मिन् नैयायिक-मार्गमनुसरतां केषाञ्चन वैयाकरणानां कैयट-हरत्तादीनामपि वर्गेऽस्मिन् परिगणनमुचितं प्रतिभाति। पक्षान्तरे समासे शक्तिमिच्छतां कुमारिलभट्टसदृशानां केषाञ्चन मीमांसकानां वैयाकरणकोटौ अन्तर्भावः समीचीनः प्रतीयते। बहुवीहि-समासप्रसङ्गे एकस्मिन्नेव कोटौ स्थापितानां नैयायिक-मीमांसकानामपि परस्परं मतानैक्यं परिलक्ष्यते। नैयायिकाः बहुव्रीहौ पद-लक्षणां स्वीकुर्वन्ति परन्तु मीमांसका अत्र वाक्यलक्षणामभिप्रयन्ति। नैयायिकेषु गङ्गेशः किञ्चिदन्यथा चिन्तयति। सः सर्वत्र निरूढलक्षणां समर्थयति।

समासशक्तिमधिकृत्य शास्त्रकारेषु यावन्तो विवादाः सन्ति तदनुरुध्य विषयेऽस्मिन् कस्याश्चन शोधात्मिकायाः परिचर्चायाः कृते महानवकाशोऽस्ति। पूर्वोक्तेषु त्रिषु सम्प्रदायेषु विषयमेनमधिकृत्य कदा कानि परिवर्तनानि अभवन्, तथा सिद्धान्तेऽस्मिन् कस्य समये कस्मिंश्च ग्रन्थे कीदृशः क्रमविकासः सञ्जात इति विचारयितुं अस्याः सङ्गोष्ठ्या अवतरणम्। विषयोऽयं महान्व्यापकः। एतादृश्यां सङ्गोष्ठ्यां इयता महता विषयेण सह सर्वथा न्यायं कर्तुं न शक्यते इति वयम् अस्माकं सीमानमपि जानीमः। तथापि समासशक्तेः परावर्तनबिन्दवोऽत्र साङ्गोपाङ्गं विचारयिष्यन्ते। यद्यपि समासशक्तेः क्रमविकासप्रसङ्गे लक्षणावादिनः नैयायिक-मीमांसकाः स्वतः पृथक्कृतास्तथापि तन्मतोपस्थापनं विना सैद्धान्तिकमतस्योपस्थापनं, प्रतिपादनं च सम्यक्तया कर्तुं न शक्यते इति धिया प्रसङ्गतस्तयोः सम्प्रदाययोः विचारः अपि प्रस्तोष्यते। नैयायिकेषु केवलं नव्या एव स्व-स्वग्रन्थेषु समासार्थविषये विचारान्प्रस्तुवन्ति। नव्येष्वपि गङ्गेश-जगदीशयोरवदानमुल्लेखनीयं वर्तते।

# Prologue

Whether the meaning of compound (cp) is conveyed by *shakti* 'primary denotation' or *Lakshana* 'implication' is a riddle before the scholars of Sanskrit grammar. An age-long debate continues between the grammarians on one hand and the Naiyayika-s and some schools of Mimamsaka-s on the other. The Naiyayika-s maintain that it is *Lakshana* which fixes the meaning of cp, whereas the grammarians prefer *shakti* for this purpose. The grammarians, however, are in favour of accepting *shakti* in the cp as a whole, without taking the meaning of constituents into consideration. Therefore, they have appropriately named the term *shakti* used in cp as *Samudayashakti, Vishishtashakti, Atiriktashakti, Samuhashakti, Ekashakti, Klruptashakti, Svatntrashakti, Akhandashakti* and so on.

The issue becomes more complicated when the Lakshanavadins differ from each other in course of argument by giving scope for various types of *Lakshana* in this context. The possible types of *Lakshana* are : *Pada-lakshana (Purvapada/Uttarapada/ Ubhayapada),Vakya-lakshana,Samudaya-lakshana, Vishishta-lakshana, Samuha-lakshana, Sahitya-lakshana, Sambandha-lakshana, Shakyasambandha-lakshana,Samipya-lakshana,Prashastya-lakshana, Jahatsvartha-lakshana, Ajahatsvartha-lakshana, Nirudha-lakshana* and so on.

Thus, the present issue can be classified into two broad groups : (i) a group which does not accept *shakti* in cp to prefer *lakshana* and (ii) a group which accepts *shakti* to arrive at the meaning of cp. Although basically the Naiyayikas and the Mimamsaks form the former group and the grammarians form the other, some Mimamsaks like Kumarilabhatta accept the grammarian's view, whereas some grammarians like Kaiyata and Haradatta follow the Naiyayika's way to some extent. Shavarasvamin clearly postulates for *Lakshana* in this context and so also all other thinkers of Bhatta-school including Somanatha and Khandadeva etc.

With regard to *Lakshana* in *bahuvrihi*-compound the Naiyayika-s and the Mimamsaka-s have different opinions. The Naiyayika-s accept *Padalakshana*, whereas the Mimamsaka-s accept *Vakyalakshana*. Gangesha differs further by accepting *Nirudhalakshana* for the similar purpose.

Because of this controversy, this topic has been constantly drawing the attention of the scholars of India and abroad. As a result, a good number of attempts have been made in this direction to unveil the truth. In spite of this fact, the issue remains still shrouded with mystery for the students and scholars of all time.

Thus, the present topic seems very much interesting and challenging, because, all the leading Indian schools of semantics (Nyaya/Vyakarana/Mimamsa) have something different to speak on this complicated issue. Therefore, an attempt is being made through the present International Seminar to trace the possible turning points in the concept of *Samasashakti* by showing the historical development along with the arguments of different schools for and against of this particular issue.

# ॥ पद्यमयी प्रस्तावना ॥

समासार्थः कथं बोध्यः शक्त्या लक्षणयाऽपि वा।
प्रवर्तते च शास्त्रेषु विचारो विषये महान्।१।

नैयायिकैः प्रसङ्गेऽस्मिन् लक्षणाऽङ्गीकृता मुदा।
वैयाकरणकोटौ तु विशिष्टा शक्तिरिष्यते।२।

नामान्तराणि तच्छक्तेः प्रसिद्ध्यन्ति स्वरूपतः।
क्वचिच्छमासशक्तिः सा समुदायाभिधाऽपि वा।३।

क्वचिदखण्डशक्तिस्सा अतिरिक्ता क्वचित् पुनः।
क्वचित्क्लृप्ता स्वतन्त्रा वा समूहशक्तिरेव वा।४।

प्रसिद्ध्यतः लक्षणे द्वे पदवाक्याभिधे पुनः।
समुदायसमूहाभ्यां साहित्यलक्षणा क्वचित्।५।

विशिष्ट-लक्षणा काचित् सम्बन्धलक्षणाऽपरा।
लक्षित-लक्षणा काचित् निरूढाऽपि क्वचित्पुनः।६।

लक्षणा शक्यसम्बद्धा सामीप्य-लक्षणाऽपि वा।
जहत्स्वार्थाऽजहत्स्वार्थे प्राशस्त्य-लक्षणा क्वचित्।७।

तत्र मीमांसकैः प्रायो वाक्यलक्षणा सम्मता।
एवं शक्तिस्समासार्थे लक्षणा च विशिष्यते।८।

इमं विषयमादाय सङ्गोष्ठीयमायोज्यते।
व्यापकताप्रदानाय सा चान्ताराष्ट्रिया पुनः।९।

भारताद्विदेशाच्चापि विद्वांसो ये समुत्सुकाः।
सप्रश्रयं निवेद्यन्ते भागग्रहणकामिनः।१०।



## ॥ सम्भावित-विषयाः॥

1. प्राचीन-व्याकरण-परम्परायां समासार्थविचारः
   - पूर्वपाणिनीयव्याकरणसम्प्रदाये समासार्थविचारः
   - पाणिनेः मते समासार्थविचारः
   - कात्ययान-मते समासार्थविचारः
   - पतञ्जलि-मते समासार्थविचारः
   - भर्तृहरि-मते समासार्थविचारः
   - कैयट-मते समासार्थविचारः
   - हरदत्त-मते समासार्थविचारः
   - अन्येषां च मते समासार्थविचारः
2. नव्यव्याकरण-परम्परायां समासार्थविचारः
   - भट्टोजीदीक्षित-मते समासार्थविचारः
   - कौण्डभट्टमते समासार्थविचारः
   - नागेश-मते समासार्थविचारः
   - अन्येषां च मते समासार्थविचारः
3. पाणिनीयेतर-व्याकरण-परम्परायां समासार्थविचारः
   - चान्द्र-जैनेन्द्र-कातन्त्र-शाकटायन-सिद्धहेमचन्द्रादि-पाणिनीयेतर-व्याकरण-परम्परासु समासार्थविचारः
4. न्यायशास्त्रे समासार्थविचारः
   - गङ्गेश-मते समासार्थविचारः
   - जगदीश-मते समासार्थविचारः
   - अन्येषाञ्च नैयायिकानां मते समासार्थविचारः
5. मीमांसाशास्त्रे समासार्थविचारः
   - कृमारिलभट्ट-मते समासार्थविचारः
   - शबरस्वामी-मते समासार्थविचारः
   - खण्डदेव-मते समासार्थविचारः
   - अन्येषाञ्च मीमांसकानां मते समासार्थविचारः
6. विभिन्न-सम्प्रदायेषु समासभेदाः
   - पूर्वपाणिनीयव्याकरणपरम्परायां समासभेदाः
   - पाणिनीयव्याकरणपरम्परायां समासभेदाः
   - पाणिन्युत्तर-व्याकरणपरम्परायां समासभेदाः
   - प्रबोधचन्द्रिकायां समासभेदाः
   - भोजस्य शृङ्गारप्रकाशे समासभेदाः
   - रूपावतारादिषु समासभेदाः
   - चान्द्र-जैनेन्द्र-कातन्त्र-शाकटायन-सिद्धहेमचन्द्रादिपाणिनीयेतरव्याकरण-परम्परासु समासभेदाः
   - पालिप्राकृतव्याकरणेषु समासभेदाः
7. विभिन्न-सम्प्रदायेषु समासपरिभाषा
   - पूर्वपाणिनीयव्याकरणपरम्परायां समास-परिभाषा
   - पाणिनीयव्याकरणपरम्परायां समास-परिभाषा
   - पाणिन्युत्तर-व्याकरणपरम्परायां समास-परिभाषा
   - प्रबोधचन्द्रिकादिषु समास-परिभाषा
   - भोजस्य शृङ्गारप्रकाशे समास-परिभाषा
   - रूपावतारादिषु समासपरिभाषा
   - चान्द्र-जैनेन्द्र-कातन्त्र-शाकटायन-सिद्धहेमचन्द्रादि-पाणिनीयेतर-व्याकरण-परम्परासु समास-परिभाषाः
   - पालिप्राकृतव्याकरणेषु समास-परिभाषाः
8. अप्रकाशितहस्तलेखेषु समासार्थविचारः
9. समासशक्तिसिद्धान्तस्य परावर्तनबिन्दवः ऐतिहासिकक्रमविकासश्च
10. आधुनिकविदुषां शोधग्रन्थेषु समासार्थविचारः

## सत्रविवरणम्

### २९.०१.२०१९

| | |
|---|---|
| १. उद्घाटनसत्रम् | ११ -१२ |
| २. विशिष्टव्याख्यानम् | १२ - ०१ |
| - भोजनावकाशः | ०१-०२ |
| ३. प्रथमं पत्रवाचनसत्रम् | ०२ - ३.३० |
| - चायपानविरतिः | ३.३०-३.४५ |
| ४. द्वितीयं पत्रवाचनसत्रम् | ०३.४५ - ५.३० |

### ३०.०१.२०१९

| | |
|---|---|
| १. तृतीयं पत्रवाचनसत्रम् | १० - ११.३० |
| - चायपानविरतिः | ११.३०-११.४५ |
| २. चतुर्थं पत्रवाचनसत्रम् | ११.४५- ०१ |
| - भोजनावकाशः | ०१-०२ |
| ३. पञ्चमं पत्रवाचनसत्रम् | ०२ - ३-१५ |
| - चायपानविरतिः | ३.१५-३.३० |
| ४. समापनसत्रम् | ३.३० - ०५ |

वि.द्र.—विद्वांसः अस्याः संगोष्ठ्या मुख्यविषय-उपविषयसम्बद्धानन्यान् विषयानपि आधृत्य शोधपत्राणि प्रस्तोतुं प्रभवन्ति।

## संगोष्ठीसम्बद्धा आवश्यका निर्देशाः सूचनाश्च–

१. सङ्गोष्ठ्याः दिनाङ्कः – २८-२९, जनवरी, २०१९
२. शोधपत्राणि संस्कृतम्/हिन्दी/आङ्ग्लम् इति तिसृभिः भाषाभिः प्रस्तोतुं शक्यन्ते ।
३. शोधपत्राणि यूनिकोड/कृतिदेव/वाक्मैन चाणक्यद्वारा उट्टङ्कितानि भवितुमर्हन्ति ।
४. शोधपत्राणि banamali7@gmail-com ईमेल-सङ्केतेन प्रेषयितुं शक्यन्ते ।
५. शोधपत्रसारांश/शोधपत्रप्रेषणस्य अन्तिमा तिथिः - १०-०१-२०१९
६. सङ्गोष्ठ्यामस्यां भागग्रहणाय पञ्जीकरणं निःशुल्कं भविष्यति ।
७. सर्वेषां प्रतिभागिनां भोजनावासादिव्यवस्थाः परिसरेण कल्पयिष्यन्ते ।
८. यात्राव्ययः छात्र-प्रतिभागिभिः स्वयं वोढव्यः भविष्यति।
९. आमन्त्रित-विदुषां मार्गव्ययस्तु परिसरेण यथाप्रतिश्रुतरीत्या निर्वक्ष्यते।

संयोजकः - प्रो. बनमाली बिश्वालः
सहसंयोजकौ–श्री श्रीओम शर्मा, डा. नीतेश द्विवेदी च




संयोजकः
**प्रो. बनमालीबिश्वालः**
व्याकरणविभागाध्यक्षः
राष्ट्रियसंस्कृतसंस्थानम् (समविश्वविद्यालयः)
**श्रीरघुनाथकीर्तिपरिसरः**
देवप्रयागः, पौडीगढवालः, उत्तराखण्डः - 249 301
जङ्गम-दूरवाणी-94507 81742, व्हाट्स-अप-78399 08471
ई-मेल-banamali7@gmail.com

आयोजकः अध्यक्षश्च
**प्रो. के.बी.सुब्बरायुडुः**
प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम् (समविश्वविद्यालयः)
**श्रीरघुनाथकीर्तिपरिसरः**
देवप्रयागः, पौडीगढवालः, उत्तराखण्डः - 249 301
दूरवाणी-01375 266028
ई-मेल-srkcampus@gmail.com